# Radha Sahasranama Namavali 1 a to kSha 1000 Names

# राधासहस्रनामावलिः १ अकारादि क्षकारान्तानि

## Document Information

Text title : RadhasahasranamAvaliH 1 from Radha Manasa Tantra 1000 Names

File name : rAdhAsahasranAmAvaliH1.itx

Category : sahasranAmAvalI, devii, radha, stotra, devI, nAmAvalI

Location : doc_devii

Proofread by : PSA Easwaran

Description-comments : Radha Manasa Tantra, See corresponding stotra

Latest update : August 1, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 1, 2020

*sanskritdocuments.org*

Radha Sahasranama Namavali 1 a to kSha 1000 Names

# राधासहस्रनामावलिः १ अकारादि क्षकारान्तानि

वन्दे वृन्दावनानन्दा राधिका परमेश्वरी ।
गोपिकां परमां श्रेष्ठां ह्लादिनीं शक्तिरूपिणीम् ॥

श्रीराधां परमाराज्यां कृष्णसेवापरायणाम् ।
श्रीकृष्णाङ्ग सदाध्यात्री नवधाभक्तिकारिणी ॥

येषां गुणमयी-राधा वृषभानुकुमारिका ।
दामोदरप्रिया-राधा मनोभीष्टप्रदायिनी ॥

तस्या नामसहस्रं त्वं श्रुणु भागवतोत्तमा ॥

मानसतन्त्रे अनुष्टुप्छन्दसे अकारादि क्षकारान्तानि
श्रीराधिकासहस्रनामानि ॥

ॐ अनन्तरूपिण्यै राधायै नमः । अपारगुणसागरायै । अध्यक्षरायै ।
आदिरूपायै । अनादिरासेश्वर्यै । अणिमादिसिद्धिदात्र्यै । अधिदेव्यै ।
अधीश्वर्यै । अष्टसिद्धिप्रदायै देव्यै । अभयायै । अखिलेश्वर्यै ।
अनङ्गमञ्जरीभग्नायै । अनङ्गदर्पनाशिन्यै । अनुकम्पाप्रदायै
राधायै । अपराधप्रणाशिन्यै । अन्तर्वेत्र्यै । अधिष्ठात्र्यै ।
अन्तर्याम्यै । सनातन्यै । अमलायै नमः । २०

ॐ अबलायै नमः । बालायै । अतुलायै । अनूपमायै ।
अशेषगुणसम्पन्नायै । अन्तःकरणवासिन्यै । अच्युतायै । रमण्यै ।
आद्यायै । अङ्गरागविधायिन्यै । अरविन्दपदद्वन्द्वायै । अध्यक्षायै ।
परमेश्वर्यै । अवनीधारिण्यै देव्यै । अचिन्त्याद्भुतरूपिण्यै ।
अशेषगुणसारायै । अशोकायै । शोकनाशिन्यै । अभीष्टदायै ।
अंशमुख्यै नमः । ४०

ॐ अक्षयायै नमः । अद्भुतरूपिण्यै । अवलम्बायै । अधिष्ठात्र्यै ।
अकिञ्चनवरप्रदायै । अखिलानन्दिन्यै । आद्यायै । अयानायै ।

कृष्णमोहिन्यै । सर्वशास्त्राणां अवध्यै । आपदुद्धारिण्यै । शुभायै ।
आह्लादिन्यै । आदिशक्त्यै । अन्नदायै । अभयायै । अन्नपूर्णायै ।
अहोधन्यायै । अतुल्यायै । अभयप्रदायै नमः । ६०

ॐ इन्दुमुख्यै नमः । दिव्यहासायै । इष्टभक्तिप्रदायिन्यै ।
इच्छामय्यै । इच्छारूपायै । इन्दिरायै । ईश्वर्यै । अपरायै ।
इष्टदायिने ईश्वर्यै । मायायै । इष्टमन्त्रस्वरूपिण्यै ।
ओङ्काररूपिण्यै देव्यै । उर्व्यै । सर्वजनेश्वर्यै । ऐरावतवत्यै ।
पूज्यायै । अपारगुणसागरायै । कृष्णप्राणाधिकायै राधायै ।
कृष्णप्रेमविनोदिन्यै । श्रीकृष्णाङ्गसदाध्याय्यै नमः । ८०

ॐ कृष्णानन्दप्रदायिन्यै नमः । कृष्णायै । अह्लादिनीदेव्यै ।
कृष्णध्यानपरायणायै । कृष्णसम्मोहिन्यै । नित्यायै ।
कृष्णानन्दप्रवर्धिन्यै । कृष्णानन्दायै । सदानन्दायै ।
कृष्णकेल्यै । सुखास्वदायै । कृष्णप्रियायै । कृष्णकान्तायै ।
कृष्णसेवापरायणायै । कृष्णप्रेमाब्धिसभर्यै ।
कृष्णप्रेमतरङ्गिण्यै । कृष्णचित्तहरायै देव्यै । कीर्तिदायै ।
कुलपद्मिन्यै । कृष्णमुख्यै नमः । १००

ॐ हासमुख्यै नमः । सदाकृष्णकुतूहल्यै । कृष्णानुरागिण्यै ।
धन्यायै । किशोर्यै । कृष्णवल्लभायै । कृष्णकामायै ।
कृष्णवन्द्यायै । कृष्णाब्धे सर्वकामनायै । कृष्णप्रेममय्यै
राधायै । कल्याण्यै । कमलाननायै । कृष्णसून्मादिन्यै ।
काम्यायै । कृष्णलीलाशिरोमण्यै । कृष्णसञ्जीवन्यै राधायै ।
कृष्णवक्षस्थलस्थितायै । कृष्णप्रेमसदोन्मत्तायै ।
कृष्णसङ्गविलासिन्यै । श्रीकृष्णरमण्यै राधायै नमः । १२०

ॐ कृष्णप्रेमायै नमः । अकलङ्किण्यै । कृष्णप्रेमवतीकर्त्र्यै ।
कृष्णभक्तिपरायणायै । श्रीकृष्णमहिष्यै । पूर्णायै ।
श्रीकृष्णाङ्गप्रियङ्कर्यै । कामगात्रायै । कामरूपायै ।
कलिकल्मषनाशिन्यै । कृष्णसंयुक्तकामेश्यै ।
श्रीकृष्णप्रियवादिन्यै । कृष्णशक्त्यै । काञ्चनाभायै ।
कृष्णायै । कृष्णप्रियायै । सत्यै । कृष्णप्राणेश्वर्यै ।
धीरायै । कमलाकुञ्जवासिन्यै नमः । १४०

ॐ कृष्णप्राणाधिदेव्यै नमः । किशोरानन्ददायिन्यै ।
कृष्णप्रसाध्यमानायै । कृष्णप्रेमपरायणायै ।
कृष्णवक्षस्स्थितायै देव्यै । श्रीकृष्णाङ्गसदाव्रतायै ।
कुञ्जाधिराजमहिष्यै । कूजन्नूपुररञ्जन्यै । कारुण्यामृतपाथोध्यै ।
कल्याण्यै । करुणामय्यै । कुन्दकुसुमदन्तायै । कस्तूरिबिन्दुभिः
शुभायै । कुचकुड्मलसौन्दर्यायै । कृपामय्यै । कृपाकर्यै ।
कुञ्जविहारिण्यै । गोप्यै । कुन्ददामसुशोभिन्यै । कोमलाङ्ग्यै नमः । १६०

ॐ कमलाङ्घ्र्यै नमः । कमलायै । कमलाननायै । कन्दर्पदमनायै
देव्यै । कौमार्यै । नवयौवनायै । कुङ्कुमचर्चिताङ्ग्यै ।
केसरीमध्यमोत्तमायै । काञ्चनाङ्ग्यै । कुरङ्गाक्ष्यै ।
कनकाङ्गुलिधारिण्यै । करुणार्णवसम्पूर्णायै । कृष्णप्रेमतरङ्गिण्यै ।
कल्पद्रुमायै । कृपाध्यक्षायै । कृष्णसेवापरायणायै ।
खञ्जनाक्ष्यै । खनीप्रेम्णायै । अखण्डितायै । मानकारिण्यै नमः । १८०

ॐ गोलोकधामिन्यै राधायै नमः । गोकुलानन्ददायिन्यै ।
गोविन्दवल्लभायै देव्यै । गोपिन्यै । गुणसागरायै । गोपालवल्लभायै ।
गोप्यै । गौराङ्ग्यै । गोधनेश्वर्यै । गोपाल्यै । गोपिकाश्रेष्ठायै ।
गोपकन्यायै । गणेश्वर्यै । गजेन्द्रगामिन्यै । गण्यायै ।
गन्धर्वकुलपावन्यै । गुणाध्यक्षायै । गणाध्यक्षायै । गवां गत्यै ।
गुणाकरायै नमः । २००

ॐ गुणगम्यायै नमः । गृहलक्ष्म्यै । गोप्ये चूडाग्रमालिकायै ।
गङ्गागीतागतिर्दात्र्यै । गायत्र्यै । ब्रह्मरूपिण्यै । गन्धपुष्पधरायै
देव्यै । गन्धमाल्यादिधारिण्यै । गोविन्दप्रेयस्यै । धीरायै ।
गोविन्दबन्धकारणायै । ज्ञानदायै । गुणदायै । गम्यायै । गोपिन्यै ।
गुणशोभिन्यै । गोदावर्यै । गुणातीतायै । गोवर्धनधनप्रियायै ।
गोपिन्यै नमः । २२०

ॐ गोकुलेन्द्राण्यै नमः । गोपिकायै । गुणशालिन्यै । गन्धेश्वर्यै ।
गुणालम्बायै । गुणाङ्ग्यै । गुणपावन्यै । गोपालस्य प्रियायै
राधायै । कुञ्जपुञ्जविहारिण्यै । गोकुलेन्दुमुख्यै । वृन्दायै ।
गोपालप्राणवल्लभायै । गोपाङ्गनाप्रियायै राधायै । गौराङ्ग्यै ।
गौरवान्वितायै । गोवत्सधारिण्यै । वत्सायै । सुबलावेशधारिण्यै ।

गीर्वाणवन्द्यायै । गीर्वाण्यै नमः । २४०

ॐ गोपिन्यै नमः । गणशोभितायै । घनश्यामप्रियायै । धीरायै ।
घोरसंसारतारिण्यै । घूर्णायमाननयनायै । घोरकल्मषनाशिन्यै ।
चैतन्यरूपिण्यै देव्यै । चित्तचैतन्यदायिन्यै ।
चन्द्रानना (आननी नोत् फ़ोउन्द् इन् दिच्तिओनर्य्। । चन्द्रकान्त्यै ।
चन्द्रकोटिसमप्रभायै । चन्द्रावल्यै । शुक्लपक्षायै । चन्द्रायै ।
कृष्णवल्लभायै । चन्द्रार्कनखरज्योत्यै । चारुवेण्यै ।
शिखारुच्यै । चन्दनैश्चर्चिताङ्ग्यै नमः । २६०

ॐ चतुरायै नमः । चञ्चलेक्षणायै । चारुगोरोचनायै ।
गौर्यै । चतुर्वर्गप्रदायिन्यै । श्रीमत्यै । चतुराध्यक्षायै ।
चरमागतिदायिन्यै । चराचरेश्वर्यै देव्यै । चिन्तातीतायै ।
जगन्मय्यै । चतुःषष्टिकलालम्बायै । चम्पापुष्पविधारिण्यै ।
चिन्मय्यै । चिच्छक्तिरूपायै । चर्चिताङ्ग्यै । मनोरमायै ।
चित्रलेखायै । श्रीरात्र्यै । चन्द्रकान्तिजितप्रभायै नमः । २८०

ॐ चतुरापाङ्गमाधुर्यायै नमः । चारुचञ्चललोचनायै ।
छन्दोमय्यै । छन्दरूपायै । छिद्रछन्दोविनाशिन्यै । जगत्कर्त्र्यै ।
जगद्धात्र्यै । जगदाधाररूपिण्यै । जयङ्कर्यै । जगन्मात्रे ।
जगदानन्दकारिण्यै ओर् जगदाद्यन्तकारिण्यै । जयप्रदायै । जयायै ।
लक्ष्म्यै । जयन्त्यै । सुयशप्रदायै । जाम्बूनदायै । हेमकान्त्यै ।
जयावत्यै । यशस्विन्यै नमः । ३००

ॐ जगद्धितायै नमः । जगत्पूज्यायै । जनन्यै । लोकपालिन्यै ।
जगद्धात्र्यै । जगत्कर्त्र्यै । जगद्बीजस्वरूपिण्यै । जगन्मात्रे ।
योगमायायै । जीवानां गतिदायिन्यै । जीवाकृतये । योगगम्यायै ।
यशोदानन्ददायिन्यै । जपाकुसुमसङ्काशायै । पादाब्जामणिमण्डितायै ।
जानुद्युतिजितोत्फुल्लायै । यन्त्रणाविघ्नघातिन्यै । जितेन्द्रियायै ।
यज्ञरूपायै । यज्ञाङ्ग्यै नमः । ३२०

ॐ जलशायिन्यै नमः । जानकीजन्मशून्यायै । जन्ममृत्युजराहरायै ।
जाह्नव्यै । यमुनारूपायै । जाम्बूनदस्वरूपिण्यै ।
झणत्कृतपदाम्भोजायै । जडतारिनिवारिण्यै । टङ्कारिण्यै ।
महाध्यानायै । दिव्यवाद्यविनोदिन्यै । तप्तकाञ्चनवर्णाभायै ।

त्रैलोक्यलोकतारिण्यै । तिलपुष्पजितायै नासायै । तुलसीमञ्जरीप्रियायै ।
त्रैलोक्याकर्षिण्यै राधायै । त्रिवर्गफलदायिन्यै ।
तुलसीतोषकर्त्र्यै । कृष्णचन्द्रतपस्विन्यै ।
तरुणादित्यसङ्काशायै नमः । ३४०

ॐ नखश्रेणीसमप्रभायै नमः । त्रैलोक्यमङ्गलायै देव्यै ।
दिग्धमूलपदद्वय्यै । त्रैलोक्यजनन्यै राधायै । तापत्रयनिवारिण्यै ।
त्रैलोक्यसुन्दर्यै । धन्यायै । तन्त्रमन्त्रस्वरूपिण्यै । त्रिकालज्ञायै ।
त्राणकर्त्र्यै । सदा त्रैलोक्यमङ्गलायै । तेजस्विन्यै । तपोमूर्त्यै ।
तापत्रयविनाशिन्यै । त्रिगुणाधारिण्यै देव्यै । तारिण्यै ।
त्रिदशेश्वर्यै । त्रयोदशवयोनित्यायै । तरुण्यै । नवयौवनायै नमः । ३६०

ॐ हृत्पद्मे स्थितिमत्यै नमः । स्थानदात्र्यै । पदाम्बुजायै ।
स्थितिरूपायै । स्थिरायै । शान्तायै । स्थितसंसारपालिन्यै ।
दामोदरप्रियायै । धीरायै । दुर्वासोवरदायिन्यै । दयामय्यै ।
दयाध्यक्षायै । दिव्ययोगप्रदर्शिन्यै । दिव्यानुलेपनारागायै ।
दिव्यालङ्कारभूषणायै । दुर्गतिनाशिन्यै राधायै । दुर्गायै ।
दुःखविनाशिन्यै । देवदेव्यै । महादेव्यै नमः । ३८०

ॐ दयाशीलायै नमः । दयावत्यै । दयार्द्रसागरायै राधायै ।
महादारिद्र्यनाशिन्यै । देवतानां दुराराध्यायै । महापापविनाशिन्यै ।
द्वारकावासिन्यै देव्यै । दुःखशोकविनाशिन्यै । दयावत्यै ।
द्वारकेशायै । दोलोत्सवविहारिण्यै । दान्तायै । शान्तायै ।
कृपाध्यक्षायै । दक्षिणायज्ञकारिण्यै । दीनबन्धुप्रियायै
देव्यै । शुभायै । दुर्घटनाशिन्यै । ध्वजवज्राब्जपाशाङ्घ्रै ।
धीमहीचरणाम्बुजायै नमः । ४००

ॐ धर्मातीतायै नमः । धराध्यक्षायै । धनधान्यप्रदायिन्यै ।
धर्माध्यक्षायै । ध्यानगम्यायै । धरणीभारनाशिन्यै । धर्मदायै ।
धैर्यदायै । धात्र्यै । धन्यधन्यधुरन्धर्यै । धरणीधारिण्यै ।
धन्यायै । धर्मसङ्कटरक्षिण्यै । धर्माधिकारिण्यै
देव्यै । धर्मशास्त्रविशारदायै । धर्मसंस्थापनाग्रगायै ।
ध्रुवानन्दप्रदायिन्यै । नवगोरोचनायै । गौर्यै ।
नीलवस्त्रविधारिण्यै नमः । ४२०

ॐ नवयौवनसम्पन्नायै नमः । नन्दनन्दनकारिण्यै । नित्यानन्दमय्यै ।
नित्यायै । नीलकान्तमणिप्रियायै । नानारत्नविचित्राङ्ग्यै ।
नानासुखमय्यै । सुधायै । निगूढरसरासज्ञायै ।
नित्यानन्दप्रदायिन्यै । नवीनप्रवणायै । धन्यायै ।
नीलपद्मविधारिण्यै । नन्दायै । आनन्दायै । सदाऽऽनन्दायै ।
निर्मलायै । मुक्तिदायिन्यै । निर्विकारायै । नित्यरूपायै नमः । ४४०

ॐ निष्कलङ्कायै नमः । निरामयायै । नलिन्यै । नलिनाक्ष्यै ।
नानालङ्कारभूषितायै । नितम्बिन्यै । निराकाङ्क्षायै । नित्यायै ।
सत्यायै । सनातन्यै । नीलाम्बरपरीधानायै । नीलायै । कमललोचनायै ।
निरपेक्षायै । निरुपमायै । नारायण्यै । नरेश्वर्यै । निरालम्बायै ।
रक्षाकर्त्र्यै । निगमार्थप्रदायिन्यै नमः । ४६०

ॐ निकुञ्जवासिन्यै राधायै नमः । निर्गुणायै । गुणसागरायै ।
नीलाब्जायै । कृष्णमहिष्यै । निराश्रयगतिप्रदायै ।
निधूवनवनानन्दायै । निकुञ्जेश्यै । नागर्यै । निरञ्जनायै ।
नित्यरक्तायै । नागर्यै । चित्तमोहिन्यै । पूर्णचन्द्रमुख्यै
देव्यै । प्रधानायै । प्रकृतिपरायै । प्रेमरूपायै । प्रेममय्यै ।
प्रफुल्लजलजाननायै । पूर्णानन्दमय्यै राधायै नमः । ४८०

ॐ पूर्णब्रह्मसनातन्यै नमः । परमार्थप्रदायै । पूज्यायै ।
परेशायै । पद्मलोचनायै । पराशक्त्यै । पराभक्त्यै ।
परमानन्ददायिन्यै । पतितोद्धारिण्यै । पुण्यायै । प्रवीणायै ।
धर्मपावन्यै । पङ्कजाक्ष्यै । महालक्ष्म्यै । पीनोन्नतपयोधरायै ।
प्रेमाश्रुपरिपूर्णाङ्ग्यै । पद्मेलसदृशाननायै । पद्मरागधरायै
देव्यै । पौर्णमासीसुखास्वादायै । पूर्णोत्तमायै नमः । ५००

ॐ परञ्ज्योतिषे नमः । प्रियङ्कर्यै । प्रियंवदायै ।
प्रेमभक्तिप्रदायै राधायै । प्रेमानन्दप्रदायिन्यै ।
पद्मगन्धायै । पद्महस्तायै । पद्माङ्घ्र्यै । पद्ममालिन्यै ।
पद्मासनायै । महापद्मायै । पद्ममाला-विधारिण्यै । प्रबोधिन्यै ।
पूर्णलक्ष्म्यै । पूर्णेन्दुसदृशाननायै । पुण्डरीकाक्षप्रेमाङ्ग्यै ।
पुण्डरीकाक्षगेहिन्यै । परमार्थप्रदायै । पद्मायै । प्रणवरूपिण्यै नमः । ५२०

ॐ फलप्रियायै नमः । स्फूर्तिदात्र्यै । महोत्सवविहारिण्यै ।

फुल्लाब्जदिव्यनयनायै । फणिवेणीसुशोभितायै । वृन्दावनेश्वर्यै
राधायै । वृन्दावनविलासिन्यै । वृषभानुसुतायै देव्यै ।
व्रजवासीगणप्रियायै । वृन्दायै । वृन्दावनानन्दायै । व्रजेन्द्रायै ।
वरप्रदायै । विद्युद्गौर्यै । सुवर्णाङ्ग्यै । वंशीनादविनोदिन्यै ।
वृषभानुराधेकन्यायै । व्रजराजसुतप्रियायै । विचित्रपट्टचमर्यै ।
विचित्राम्बरधारिण्यै नमः । ५४०

ॐ वेणुवाद्यप्रियायै राधायै नमः । वेणुवाद्यपरायणायै ।
विश्वम्भर्यै । विचित्राङ्ग्यै । ब्रह्माण्डोदरिकायै । सत्यै ।
विश्वोदर्यै । विशालाक्ष्यै । व्रजलक्ष्म्यै । वरप्रदायै ।
ब्रह्ममय्यै । ब्रह्मरूपायै । वेदाङ्ग्यै । वार्षभानव्यै ।
वराङ्गनायै । कराम्भोजायै । वल्लव्यै । व्रजमोहिन्यै । विष्णुप्रियायै ।
विश्वमात्रे नमः । ५६०

ॐ ब्रह्माण्डप्रतिपालिन्यै नमः । विश्वेश्वर्यै । विश्वकर्त्र्यै ।
वेदमन्त्रस्वरूपिण्यै । विश्वमायायै । विष्णुकान्तायै । विश्वाङ्ग्यै ।
विश्वपावन्यै । व्रजेश्वर्यै । विश्वरूपायै । वैष्णव्यै ।
विघ्ननाशिन्यै । ब्रह्माण्डजनन्यै राधायै । वत्सलायै ।
व्रजवत्सलायै । वरदायै । वाक्यसिद्धायै । बुद्धिदायै ।
वाक्प्रदायिन्यै । विशाखाप्राणसर्वस्वायै नमः । ५८०

ॐ वृषभानुकुमारिकायै नमः । विशाखासख्यविजितायै ।
वंशीवटविहारिण्यै । वेदमात्रे । वेदगम्यायै । वेद्यवर्णायै ।
शुभङ्कर्यै । वेदातीतायै । गुणातीतायै । विदग्धायै ।
विजनप्रियायै । भक्तभक्तिप्रियायै राधायै । भक्तमङ्गलदायिन्यै ।
भगवन्मोहिन्यै देव्यै । भवक्लेशविनाशिन्यै । भाविन्यै । भवत्यै ।
भाव्यायै । भारत्यै । भक्तिदायिन्यै नमः । ६००

ॐ भागीरथ्यै नमः । भाग्यवत्यै । भूतेश्यै । भवकारिण्यै ।
भवार्णवत्राणकर्त्र्यै । भद्रदायै । भुवनेश्वर्यै । भक्तात्मने ।
भुवनानन्दायै । भाविकायै । भक्तवत्सलायै । भुक्तिमुक्तिप्रदायै
राधायै । भुजमृणालिकायै शुभायै । भानुशक्तिच्छलायै । धीरायै ।
भक्तानुग्रहकारिण्यै । माधव्यै । माधवायुक्तायै । मुकुन्दाद्यायै ।
सनातन्यै नमः । ६२०

ॐ महालक्ष्म्यै नमः । महामान्यायै । माधवस्वान्तमोहिन्यै ।
महाधन्यायै । महापुण्यायै । महामोहविनाशिन्यै । मोक्षदायै ।
मानदायै । भद्रायै । मङ्गलायै । अमङ्गलात्पदायै? ।
मनोऽभीष्टप्रदायै देव्यै । महाविष्णुस्वरूपिण्यै । माधव्याङ्ग्यै ।
मनोरामायै । रम्यायै । मुकुररञ्जन्यै । मनीषायै । वनदाधारायै ? ।
मुरलीवादनप्रियायै नमः । ६४०

ॐ मुकुन्दाङ्गकृतापाङ्ग्यै नमः । मालिन्यै । हरिमोहिन्यै । मानग्राह्यै ।
मधुवत्यै । मञ्जर्यै । मृगलोचनायै । नित्यवृन्दायै ।
महादेव्यै । महेन्द्रकृतशेखर्यै । मुकुन्दप्राणदायै । हन्त्र्यै ।
मनोहरमनोहरायै । माधवमुखपद्मास्यायै । मधुपानमधुव्रतायै ।
मुकुन्दमधुमाधुर्यायै । मुख्यायै । वृन्दावनेश्वर्यै ।
मन्त्रसिद्धिकृतायै राधायै । मूलमन्त्रस्वरूपिण्यै नमः । ६६०

ॐ मन्मथायै नमः । सुमत्यै । धात्र्यै । मनोज्ञमतिमानितायै ।
मदनामोहिन्यै । मान्यायै । मञ्जीरचरणोत्पलायै । यशोदासुतपत्न्यै ।
यशोदानन्ददायिन्यै । यौवनापूर्णसौन्दर्यायै । यमुनातटवासिन्यै ।
यशस्विन्यै । योगमायायै । युवराजविलासिन्यै । युग्मश्रीफलसुवत्सायै ।
युग्माङ्गदविधारिण्यै । यन्त्रातिगाननिरतायै । युवतीनां शिरोमण्यै ।
श्रीराधायै । परमाराध्यायै नमः । ६८०

ॐ राधिकायै नमः । कृष्णमोहिन्यै । रूपयौवनसम्पन्नायै ।
रासमण्डलकारिण्यै । राधादेव्यै । पराप्राप्तायै ।
श्रीराधापरमेश्वर्यै । राधावाग्म्यै । रसोन्माद्यै । रसिकायै ।
रसशेखर्यै । रासमयीपूर्णायै राधायै । रसज्ञायै । रसमञ्जर्यै ।
राधिकायै । रसदात्र्यै । रासविलासिन्यै राधायै । रञ्जन्यै ।
रसवृन्दायै । रत्नालङ्कारधारिण्यै नमः । ७००

ॐ रामायै नमः । रत्नायै । रत्नमय्यै । रत्नमालाविधारिण्यै ।
रमण्यै । रामण्यै । रम्यायै । राधिकारमण्यै परायै ।
रासमण्डलमध्यस्थायै । राजराजेश्वर्यै । शुभायै ।
राकेन्दुकोटिसौन्दर्यायै । रत्नाङ्गदविधारिण्यै । रासप्रियायै ।
रासगम्यायै । रासोत्सवविहारिण्यै । लक्ष्मीरूपायै । ललनायै ।
ललितादिसखिप्रियायै । लोकमात्रे नमः । ७२०

ॐ लोकधात्र्यै नमः । लोकानुग्रहकारिण्यै । लोलाक्ष्यै । ललिताङ्ग्यै ।
ललिताजीवतारकायै । लोकालयायै । लज्जारूपायै । लास्यविद्यालताशुभायै ।
ललिताप्रेमललितामुग्धप्रेमलीलावत्यै । लीलालावण्यसम्पन्नायै ।
नागर्यै । चित्तमोहिन्यै । लीलारङ्ग्यै । रत्यै । रम्यायै ।
लीलागानपरायणायै । लीलावत्यै । रतिप्रीतायै । ललिताकुलपद्मिन्यै ।
शुद्धकाञ्चनगौराङ्ग्यै नमः । ७४०

ॐ शङ्खकङ्कणधारिण्यै नमः । शक्तिसञ्चारिण्यै देव्यै ।
शक्तीनां शक्तिदायिन्यै । सुचारुकबरीयुक्तायै । शशिरेखायै ।
शुभङ्कर्यै । सुमत्यै । सुगत्यै । धात्र्यै । श्रीमत्यै ।
श्रीहरिप्रियायै । सुन्दराङ्ग्यै । सुवर्णाङ्ग्यै । सुशीलायै ।
शुभदायिन्यै । शुभदायै । सुखदायै । साध्व्यै । सुकेश्यै ।
सुमनोरमायै नमः । ७६०

ॐ सुरेश्वर्यै नमः । सुकुमार्यै । शुभाङ्ग्यै । सुमशेखरायै ।
शाकम्भर्यै । सत्यरूपायै । शस्तायै । शान्तायै । मनोरमायै ।
सिद्धिधात्र्यै । महाशान्त्यै । सुन्दर्यै । शुभदायिन्यै । शब्दातीतायै ।
सिन्धुकन्यायै । शरणागतपालिन्यै । शालग्रामप्रियायै राधायै ।
सर्वदा नवयौवनायै । सुबलायै । नन्दिन्यै देव्यै नमः । ७८०

ॐ सर्वशास्त्रविशारदायै नमः । सर्वाङ्गसुन्दर्यै राधायै ।
सर्वसल्लक्षणान्वितायै । सर्वगोपीप्रधानायै । सर्वकामफलप्रदायै ।
सदानन्दमय्यै देव्यै । सर्वमङ्गलदायिन्यै । सर्वमण्डलजीवातवे ।
सर्वसम्पत्प्रदायिन्यै । संसारपारकरण्यै । सदा कृष्णकुतूहलायै ।
सर्वगुणमय्यै राधायै । साध्यायै । सर्वगुणान्वितायै । सत्यस्वरूपायै ।
सत्यायै । सत्यनित्यायै । सनातन्यै । सर्वमाधव्यलहर्यै ।
सुधामुखशुभङ्कर्यै नमः । ८००

ॐ सदाकिशोरिकागोष्ठ्यै नमः । सुबलावेशधारिण्यै । सुवर्णमालिन्यै
राधायै । श्यामसुन्दरमोहिन्यै । श्यामामृतरसे मग्नायै । सदा
सीमन्तिनीसख्यै । षोडशीवयसा नित्यायै । षड्रागविहारिण्यै ।
हेमाङ्ग्यै । वरदायै । हन्त्र्यै । भूमात्रे । हंसगामिन्यै ।
हासमुख्यै । व्रजाध्यक्षायै । हेमाब्जायै । कृष्णमोहिन्यै ।
हरिविनोदिन्यै राधायै । हरिसेवापरायणायै । हेमारम्भायै नमः । ८२०

ॐ मदारम्भायै नमः । हरिहारविलोचनायै । हेमाङ्गवर्णायै ।
रम्यायै । शेषहृत्पद्मवासिन्यै । हरिपादाब्जमधुपायै ।
मधुपानमधुव्रतायै । क्षेमङ्कर्यै । क्षीणमध्यायै ।
क्षमारूपायै । क्षमावत्यै । क्षेत्राङ्ग्यै । श्रीक्षमादात्र्यै ।
क्षितिवृन्दावनेश्वर्यै । क्षमाशीलायै । क्षमादात्र्यै ।
क्षौमवासोविधारिण्यै । क्षान्तिनामाद्वयवत्यै । क्षीरोदार्णवशायिन्यै नमः । ८३९

राधानामसहस्राणि पठेद्वा श्रुणुयादपि ।
इष्टसिद्धिर्भवेत्तस्या मन्त्रसिद्धिर्भवेत् ध्रुवम् ॥

धर्मार्थकाममोक्षांश्च लभते नात्र संशयः ।
वाञ्छासिद्धिर्भवेत्तस्य भक्तिस्यात् प्रेमलक्षण ॥

लक्ष्मीस्तस्यवसेत्गेहे मुखेभातिसरस्वती ।
अन्तकालेभवेत्तस्य राधाकृष्णेचसंस्थितिः ॥

इति श्रीराधामानसतन्त्रे श्रीराधासहस्रनामस्तोत्रान्तर्गता
नामावलिः सम्पूर्णा ॥

We have found 839 names corresponding to the rAdhAsahasranAmastotraM.

Proofread by PSA Easwaran

*Radha Sahasranama Namavali 1 a to kSha 1000 Names*
pdf was typeset on August 1, 2020

Please send corrections to *sanskrit@cheerful.com*